# संस्कृतवार्ता:

**दिनाङ्क : 22/01/2025** **सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**आदौ मुख्यवार्ता**

केन्द्रेण विपणन-ऋतोः पण्चविंशति-षड्विंशतेः कृते असंस्कृत-जूट इत्यस्य न्यूनतम-समर्थनमूल्ये पञ्चदशाधिक-त्रिशतं रूप्यकाणां वृद्धिः कृता।

प्रधानमन्त्री श्रीनरेन्द्र मोदी उक्तवान् यत् "बेटी बचाओ बेटी पढ़ाओ" इति अभियानेन, लैङ्गिकपक्षपातं दूरीकर्तुं महत्त्वपूर्णं वातावरणं निर्मितम्, अथेदं बालिका-सशक्तीकरणाय एकम् उत्तमं सोपानमस्ति

उत्तरप्रदेशस्य राज्यमन्त्रिमण्डलस्य संगोष्ठी अद्य प्रयागराजे सुसम्पन्ना, मन्त्रिमण्डलेन राज्यस्य प्रगतेः अथ लोककल्याणस्य महत्त्वपूर्ण-निर्णयाः कृताः

भारत-इंग्लैण्ड्-दलयोः मध्ये विंशतिं-प्रतिविंशति-क्रिकेट्-स्पर्धा अद्य सायं सप्तवादने कोलकत्तानगरस्य ईडन-गार्डन्-क्रीडांगणे भविष्यति।

---------------------------------------------------

**मन्त्रिमण्डल-संक्षेपः** –

विपणन-ऋतोः पण्चविंशति-षड्विंशतेः कृते असंस्कृत-जूट इत्यस्य न्यूनतम-समर्थनमूल्यं वर्धयितुं सर्वकारेण निर्णयः कृतः अस्ति।

अद्य नवीदिल्लीनगरे मन्त्रिमण्डलनिर्णयानां विषये वार्ताहरान् ज्ञापयन् केन्द्रीय-वाणिज्य-उद्योगमन्त्री पीयूषगोयलः अवदत् यत्, असंस्कृत-जूट इत्यस्य कृते पंचाशदोत्तर-षट्शताधिक-पञ्चसहस्रं रुप्यकाणां एमएसपी इति न्यूनतम-समर्थनमूल्यं प्रदत्तं भविष्यति।

सः अवदत् यदेतेन चत्वारिंशत् लक्षं परिवाराः साहाय्यं प्राप्नुवन्ति।

मन्त्री सूचितवान् यत् केन्द्रीयमन्त्रिमण्डलेन राष्ट्रियस्वास्थ्यमिशनस्य अन्तर्गतं प्राप्तस्य प्रगतेः समीक्षा कृता।

---------------------------------------------------

**प्रधानमन्त्री – बेटी बचावो**

प्रधानमन्त्री श्रीनरेन्द्र मोदी उक्तवान् यत् "बेटी बचाओ बेटी पढ़ाओ" इत्यभियानं परिवर्तनकारी, जनसञ्चालितं उपक्रमं च जातम्, एवं सर्वेऽपि जनाः अस्मिन् अभियाने सहभागितां दर्शितवन्तः। आन्दोलनस्य दशवर्षा-पूर्तौ प्रधानमन्त्रिणा संजालीय-माध्यम-सन्देशे

उक्तं यत् "बेटी बचाओ बेटी पढ़ाओ" इति अभियानेन, लैङ्गिकपक्षपातं दूरीकर्तुं महत्त्वपूर्णं वातावरणं निर्मितम्। तथा च बालिकायाः शिक्षायाः उपलब्धिः, तस्याः स्वप्नानां-लक्ष्यानां च प्राप्त्यर्थं अवसराणां निर्माणे समीचीनवातावरणस्य प्रकल्पः कृतः। प्रधानमन्त्री श्रीमोदी सबलं उक्तवान् यत् ऐतिहासिकदृष्ट्या न्यूनबाल-लिंगानुपातयुक्तेषु मण्डलेषु महत्त्वपूर्णपारिष्कारः विदितः। सः अस्मिन् कार्ये समर्पितजनेभ्यः, विविधसामुदायिकसेवासंस्थाभ्यश्च धन्यवादं समर्पितवान्। प्रधानमन्त्री आग्रहं कृतवान् यत् सर्वेऽपि जनाः, पुत्रीणां अधिकाराणां रक्षणं निरन्तरं कुर्वन्तु, तेषां शिक्षां सुनिश्चिती-कुर्वन्तु, एतादृश-समाजस्य निर्माणं कुर्वन्तु यत्र ताः पुत्र्यः भेदभावं विना समृद्धिं प्राप्तुं शक्नुवन्ति।

---------------------------------------------------

**दिल्लीविधानसभा**

दिल्ली-विधानसभायाः निर्वाचनस्य कृते प्रचाराभियानानि सजवं प्रवर्तन्ते। प्रधानमन्त्री तथा वरिष्ठ-भाजपा-नेता श्रीनरेन्द्रमोदी, वरिष्ठ-कांग्रेस-नेता राहुल गान्धी, आम-आदमी-पार्टीदलस्य संस्थापकः अरविन्द केजरीवालः अद्य देहल्याः विभिन्न-जनपदेषु प्रचाराभियानेषु भागं भजन्ति। "मेरा बूथ सबसे मजबूत" इति कार्यक्रमस्यान्तर्गतं "नमो एप" इत्यस्य माध्यमेन भाजपादल-कार्यकर्तॄन् सम्बोधयन् श्री मोदी आरोपं कृतवान् यत् – दिल्ल्यां सत्तारूढम् आप-दलम्, निर्वाचने स्वपराजयः भविष्यतीति विज्ञाय, प्रतिदिनं नूतन-नूतन-आश्वासनानि यच्छति। श्रीमोदी दल-कार्यकर्तृभ्यः आग्रहं कृतवान् यत् ते अत्यधिकमतदानस्य सुनिश्चयं कुर्युः तथा च ते कार्यकर्तारः स्वस्य स्वस्य बूथ-स्तरे पंचाशत्-प्रतिशतमतानाम् आधिक्येन विजयं प्राप्तुं लक्ष्यं स्थापयेयुः।

श्री मोदी आम-आदमी-पार्टी अथ कांग्रेस दलयोः उपरि आरोपं कृतवान् यत् ते नेतारः दिल्ल्याः जनानां विश्वासघातं कृतवन्तः।

---------------------------------------------------

**ईपीएफओ-सदस्याः**

कर्मचारी-भविष्यनिधि-सङ्घटनेन (ईपीएफओ) गत-नवम्बरमासे त्रिषष्टि-सहस्राधिक चतुर्दश-लक्षं सदस्यानां नाम समायोजितम्। गत-अक्टोबरमासस्यापेक्षया इयं वृद्धिः नव-दशमलव-शून्य-सप्त प्रतिशतम् अस्ति। श्रम-उद्यम-मन्त्रालयेन उक्तं यत् वर्धमानस्य उद्यमस्य अवसराः, कर्मचारिणां लाभस्य विषये जागरूकतायाः वर्धननम्, ईपीएफओ-संस्थायाः सफलप्रसार-कार्यक्रमाः च आस्याः वृद्धेः कारणानि सन्ति।

---------------------------------------------------

**भारतीय नौसेना- गणराज्यदिवसः**

भारतीयनौसेना अस्मिन् वर्षे गणतन्त्रदिवसस्य पथसञ्चलनावसरे कार्तव्यपथे स्वस्य सादम्यभावनोत्साहं प्रदर्शयितुं सर्वविधैः सिद्धा वर्तते। भारतीयनौसेनायाः अनुसारं गणतंत्रदिवसस्य पथसञ्चलने उपसेनापतेः साहिल-अहलुवालिया इत्यस्य नेतृत्वे मार्चिंग्-दलस्य अष्टचत्वारिंशदुत्तर-एकशतं सदस्याः भागं गृह्णन्ति। अस्मिन् पथसंचलने भारतीय-नौसेनायाः षट्-महिला-अग्निवीर-सैनिकाः अपि भागं भजिष्यन्ति। तत्रैव ही भारतीय-नौसेनायाः माध्यमेन आत्मनिर्भरतायाः उपक्रमाः, देशस्य समुद्रीयशक्तिः च प्रदर्शिता भविष्यति।

---------------------------------------------------

**वैष्णव-दावोस्** :

केन्द्रीयरेलमन्त्री अश्विनी वैष्णवः अद्य दावोस्-नगरे स्विससङ्घीय-रेल-प्रतिनिधिमण्डलेन सह मिलितवान् । सत्रे तेषां सुरक्षा-प्रौद्योगिकीनां, अनुरक्षणप्रथानां च विषये विस्तृतचर्चा अभवत्। वैष्णवमहोदयः स्विट्ज़र्ल्याण्ड्देशस्य सेण्ट् मार्ग्रेथेन् इत्यत्र स्थितस्य स्टैडलर् रेल-इत्यस्य रेलकोच-निर्माणसंस्थानस्य अपि भ्रमणं कृतवान्।

---

**पासवान-दावोस्-**

खाद्य-प्रसंस्करणोद्योगमन्त्री चिराग पासवानः अवदत् यत् पेय-संस्थया एबी इन्बेव इत्यनया भारतस्य विभिन्नेषु भागेषु पञ्चविंशति-कोटि-डालरमितस्य धनराशेः निवेशस्य घोषणा कृता वर्तते । दावोस्-नगरे विश्व-आर्थिक-मञ्चस्य वार्षिक-समागमस्य समये पासवान-महोदयेन पूर्वोक्त-पेय-संस्थया सह संगोष्ठी कृता । सः अवदत् यत् भारतस्य खाद्यप्रसंस्करण-उद्योगे एतत् अपरं ऐतिहासिकं सोपानम् अस्ति, उद्योग-सृजनस्य, आर्थिक-प्रगतेः च विषये नूतनं अध्यायं लिखिष्यति। मन्त्री उक्तवान् यत् एतत् भारते वर्धमानानाम् अवसराणाम्, वैश्विक-उद्यम-संस्थानां विश्वासस्य च प्रतीकम् अस्ति । सः इदमपि उक्तवान् यत् निवेशमुद्दिश्य अस्माकं प्रधानमन्त्रिणः श्रीमोदिनः दृष्टिकोणः अतीव स्पष्टः अस्ति अथ तत्सम्बन्धी-नीतिनां कारणेन निवेशकेभ्यः प्रोत्साहनमपि प्राप्यते ।

तत्रैव हि, दावोस्-नगरे विश्व-आर्थिक-मञ्चस्य प्रथमदिने महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र-फडणवीसस्य नेतृत्वे सप्त-पंचाशदधिक-चतुःशतोत्तर-पंचविंशति-सहस्राधिक-षड्-लक्ष-कोटिरूप्यकाणां निवेशस्य विषये हस्ताक्षराणि कृतानि । एतेन एकस्मिन् दिने एतादृशी अत्यधिक-निवेशराशिः सुरक्षिता इति (न्यू-रिकार्ड्) इति नूतनः अभिलेखः अभवत् ।

---

**महाकुम्भः**

**सम्प्रति महाकुम्भसम्बद्धाः वार्ताः श्रूयन्ताम् ।**

महाकुम्भोत्सवः उत्तरप्रदेशस्य प्रयागराजे सहर्षोल्लासं प्रचलति । अस्मिन् महोत्सवे राष्ट्रियस्तरस्य खादी-प्रदर्शनी, सहस्राधिकं पर्यटकानां ध्यानम् आकर्षयति ।

**अन्यत्र,**

उत्तरप्रदेशस्य राज्यमन्त्रिमण्डलस्य एका विशेष-संगोष्ठी अद्य प्रयागराजस्य त्रिवेणी-संकुल-प्रदेशे सम्पन्ना । संगोष्ठ्यां प्रदेशस्य सर्वेऽपि चतुःपञ्चाशत्- मन्त्रिणः भागं गृहीतवन्तः । अस्यां संगोष्ठ्यां राज्यस्य प्रगतेः अथ लोकलल्याणस्य महत्त्वपूर्ण-निर्णयाः स्वीकृताः । मुख्यमन्त्री योगी आदित्यनाथः स्व-मन्त्रिपरिषदः सदस्यगणैः सह महाकुम्भोत्सवे त्रिवेणी-संगमे पवित्रस्नानं कृतवान् ।

---

**कर्णाटक-दुर्घटना**

कर्णाटकस्य उत्तरकन्नडमण्डलस्य येल्लापुर-तालूकु-जनपदे मार्गदुर्घटनायां दशजनाः मृताः, षोडशजनाश्च व्रणिताः । मृताः सवणूरु ग्रामस्थाः इति सूचना वर्तते ।

---

**क्रीडा-वार्ता**

क्रिकेट्-क्रीडायाम्, भारत-इंग्लैण्ड्-दलयोः मध्ये खेल्यमानायां विंशतिं-प्रतिविंशति-क्रिकेट्-स्पर्धायाः पंच-क्रीडा-शृंखलायाम्, प्रथमद्वन्द्वम् , अद्य सायं सप्तवादने कोलकत्तानगरस्य ईडन-गार्डन्-क्रीडांगणे भविष्यति ।

**।। इति वार्ता:।।**